# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – दिसम्बर, २०१८

| कक्षा – शास्त्री -२ (SEM-3) | प्रश्नपत्रम् -६<br>(CC 2.3.6)<br>NEW & OLD | गुणाः – ७० |
|---|---|---|
| विषयः- नव्यन्यायः | | ग्रन्थः- पञ्चलक्षणी (चतुर्थपञ्चमलक्षणे) |
| दिनाङ्कः – १०/१२/२०१८ | | समयः– २ तः ५ |

### विभागः १

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।** **१०**

१ तृतीयलक्षणत्यागे बीजं व्याख्यात।

२ 'केवलान्वयिन्यभावात्' विवृणुत।

३ साकल्यविशेषणं कुत्र कस्मात् देयमिति व्याख्यात।

**प्रश्नः २ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ चतुर्थलक्षणघटकाभावयोः प्रतियोगिवैयधिकरण्यस्य प्रयोजनं व्याख्यात।

२ चतुर्थलक्षणस्य समन्वयं सर्वत्र साधयत।

### विभागः २

**प्रश्नः ३ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** **१०**

१ घटादन्येत्यत्र नवीनानां मते पञ्चम्याः कोऽर्थः ? व्याख्यात।

२ एतद्रूपवान् एतद्रसादित्यत्र समन्वयं प्रदर्शयत।

३ 'निर्धूमत्त्वव्याप्यो निर्वह्नित्वादित्यादौ अव्याप्तिः' इति पङ्क्तिं व्याख्यात।

**प्रश्नः ४ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ चतुर्थलक्षणे हेत्वभावीयप्रतियोगितायां हेतुतावच्छेदकावच्छिन्नत्वं किमर्थमिति विवृणुत।

२ चतुर्थलक्षणस्य दलसार्थक्यं प्रतिपादयत।

## विभागः ३

**प्रश्नः ५ निम्नलिखितेषु द्वयोः व्याख्यां विवृणुत।** १०

१ 'घटत्वघटाकाशसंयोगान्यतराभाववान् आकाशत्वा'दित्यत्र अव्याप्तिम् आशङ्क्य परिहरत।

२ चतुर्थलक्षणत्यागे बीजं पञ्चमलक्षणादाने प्रयोजनं च प्रतिपादयत।

३ हेतुतावच्छेदकेति केचित्तु मतं व्याख्यात।

**प्रश्नः ६ निम्नलिखितयोः एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ पञ्चलक्षणानां त्यागे बीजं प्रत्येकं व्याख्यात।

२ पञ्चलक्षणस्य दलसार्थक्यं यथाग्रन्थं प्रतिपादयत।

**प्रश्नः ७ निम्नलिखितप्रश्नेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखन्तु।** १०

१ व्याप्तिः कतिविधा ?

२ चतुर्थलक्षणं किम् ?

३ पर्वतो धूमवान् वह्नेः इत्यत्र वह्निरूपहेतुः सद्धेतुरसद्धेतुर्वा?

४ सर्वमभिधेयं प्रमेयत्वादित्युदाहरणं कस्य हेतोः ?

५ पूर्वपक्षव्याप्तौ कति लक्षणानि सन्ति ?

६ पञ्चमं लक्षणं किम् ?

७ नानाव्यक्तिसाध्यकस्थले को दोषः?

८ भेदाभावः किं रूपः ?

९ घटादन्येत्यत्र प्राचीनानां मते पञ्चम्याः कोऽर्थः ?

१० सकलेति पदं कस्मात् ?

११ सत्ता कुत्र वर्तते ?

१२ नव्यन्यायस्य प्रवर्तक कः ?

१३ परीक्षा का ?

१४ विशिष्टसत्ता शुद्धसत्तातः भिन्ना न वा ? कस्मात् ?

१५ घटत्वसमनियतधर्मः कः ?

----xxxxxx----